# Shri Lakshmi Hayagriva Prapatti

# શ્રીલક્ષ્મીહયગ્રીવપ્રપત્તિઃ

## Document Information

Text title : Shri Lakshmi Hayagriva Prapatti

File name : lakShmIhayagrIvaprapatti.itx

Category : vishhnu, prapatti

Location : doc_vishhnu

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Latest update : September 19, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 20, 2023

*sanskritdocuments.org*

# શ્રીલક્ષ્મીહયગ્રીવપ્રપત્તિઃ

વિશુદ્ધવિજ્ઞાનઘનસ્વરૂપં વિજ્ઞાનવિશ્રાણનબદ્ધદીક્ષમ્ ।
દયાનિધિં દેહભૃતાં શરણ્યં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૧॥

બ્રહ્મણમાદૌ વ્યદધાદમુસ્મૈ વેદાંશ્ચ યઃ સ્મ પ્રહિણોતિ નિત્યાન્ ।
સ્વગોચરજ્ઞાનવિધાયિનં તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૨॥

ઉદ્ગીથતારસ્વરપૂર્વમન્તઃ પ્રવિશ્ય પાતાળતળા દહાર્સીત્ ।
આમ્માયમાકણ્ઠહયો ય એતં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૩॥

પ્રદાય પુત્રાય પુનઃ શ્રુતીર્યો જઘાન દૈત્યૌ નિયતાબ્ધિવાસમ્ ।
હવ્યૈશ્ચ કવ્યૈશ્ચ તમર્ચ્યમાનં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૪॥

યન્નાભિનાળીક દળસ્થનીરબિન્દૂત્થિતૌ તૌ મધુકૈટભાખ્યા ।
વેદાપહારોય તમોરજસ્તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૫॥

કામ્યાર્ચ્યતાં પ્રાપ્ય વરં સુરેષુ ગતેષુ યજ્ઞાગ્રહરોઽર્થિતો યઃ ।
અદર્શયત્ કાય હયં વપુસ્તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૬॥

યો જાયમાનં પુરુષં પ્રપશ્યન્ મોક્ષાર્થચિન્તાપર માતનોતિ ।
વિદ્યાધિદેવં મધુસૂદનં તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૭॥

આદિત્યબિમ્બેઽશ્વવપુર્દધત્ સન્નાયાતયામાન્ નિગમાન્ અદિક્ષત્ ।
યો યાજ્ઞવલ્ક્યાય દયાનિધિં તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૮॥

વિજ્ઞાનદાનપ્રથિતા જગત્યાં વ્યાસાદયો વાગપિ દક્ષિણા સા ।
યદ્વીક્ષણાંશાહિતવૈભવાસ્તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૯॥

મત્સ્યાદિરૂપાણિ યથા તથૈવ નાનાવિધાચાર્યવપૂંષિ ગૃહ્ણન્ ।
વેદાન્તવિદ્યાઃ પ્રચિનોતિ યસ્તં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૧૦॥

શ્રેષ્ઠઃ કૃતજ્ઞઃ સુલભોઽન્વિતાનાં શાન્તઃ સુબુદ્ધિઃ પ્રથિતો હિ વાજી ।
તદાનનાવિસ્કૃતસદ્ગુણૌઘં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૧૧॥

હસ્તૈર્દધાનં દરચક્રકોશવ્યાખ્યાનમુદ્રાઃ સિતપદ્મપીઠમ્ ।
વિદ્યાખ્યલક્ષ્મ્યઞ્ચિતવામભાગં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૧૨॥

ઇતિ શ્રીલક્ષ્મીહયગ્રીવપ્રપત્તિઃ સમાપ્તા ।

Proofread by Chandraseekhar Karumuri

*Shri Lakshmi Hayagriva Prapatti*

pdf was typeset on September 20, 2023

Please send corrections to *sanskrit@cheerful.com*